# M.A. Semester I Examination, 2014
## Sanskrit
## Paper : I
## (Vedic Studies)

**Time : Three Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

### Unit - I

1. अधोलिखितेषु यथाकामं किमपि मन्त्रद्वितयं भाष्योक्तदिशा सरलसुरगिरा व्याख्यायताम्– 2×5=10

(क) उप नः सवना गहि सोमस्य सोमपाः पिब।
गोदा इद्रेवतो मदः।।

(ख) विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः।
उस्रा इव स्वसराणि।।

(ग) सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।।

(घ) पावका नः सरस्वती वाजेभिर्वाजिनीवती।
यज्ञं वष्टु धियावसुः।।

2. अधस्तात् कश्चनान्यतमो मन्त्रो वङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा अनूद्यताम्– 5

(क) दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः।
आ यातं रुद्रवर्तनी।।

(ख) एमाशुमाशवे भर यज्ञश्रियं नृमादनम्।
पतयन्मन्दयत्सखम्।।

(ग) पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति।।

3. उपरिनिर्दिष्टेषु कस्यचिदेकस्य ऋग्वेदीयमन्त्रस्य सस्वरः पदपाठः सम्प्रदर्श्यताम्। 4

4. अधःस्थितेषु स्वाभिमतं कस्यचिदेकस्य संक्षिप्ता टिप्पणी विधेया– 3

शतक्रतुः, रसायाः, कृष्टयः, युवाकवः।

5. भवदधीतयोः संवादसूक्तयोः कस्यचिदेकस्य सारसंक्षेपः प्रस्तूयताम्। 6

अथवा

इन्द्रस्य सरस्वत्या वा चारित्रिकं वैशिष्ट्यं भवदधीतवेदभागमवलम्ब्य मन्त्रोद्धरणपुरःसरं विव्रियताम्।

### Unit - II

6. ऐतरेयब्राह्मणं केन वेदेन सम्पृक्तम्? प्रकृतस्य ब्राह्मणस्य शुनःशेपोपाख्यानान्तर्गतो नारदहरिश्चन्द्रसंवादः स्वकीयया गिरा समुपवर्ण्यताम्। 2+5=7

अथवा

शुनःशेपः कथमात्मानं पाशान्मोचयामासेति ऐतरेयब्राह्मणमनुसृत्य संक्षेपेण प्रदर्श्यताम्।

7. अनयोरेकतरा गाथा सायणोक्तरीत्या सुरगिरा व्याख्येया– 5

(क) आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।
शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति।।

(ख) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति।।